# Apaduddharakabatukabhairav Ashtottarashata Nama Stotram

# આપદુદ્ધારકબટુકભૈરવાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : Apaduddharakabatukabhairav Ashtottarashata Nama Stotram

File name : ApaduddhArakabaTukabhairavAShTottarashatanAmastotraM.itx

Category : shiva, aShTottarashatanAma, stotra

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : From rudrayAmaletantra and vishvasAroddhAratantra, See corresponding nAmAvalI

Latest update : October 13, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 27, 2025

*sanskritdocuments.org*

Apaduddharakabatukabhairav Ashtottarashata Nama Stotram

# આપદુદ્ધારકબટુકભૈરવાષ્ટોત્તરશતનામસ્તોત્રમ્

(રુદ્રયામલેતન્ત્રેવિશ્વસારોદ્ધારે)

અથ મૂલનામાવલીપાઠઃ -

ૐ હ્રીં ભૈરવો ભૂતનાથશ્ચ ભૂતાત્મા ભૂતભાવનઃ ।
ક્ષેત્રજ્ઞઃ ક્ષેત્રપાલશ્ચ ક્ષેત્રદઃ ક્ષત્રિયો વિરાટ્ ॥ ૧॥

શ્મશાનવાસી માંસાશી ખર્પરાશી સ્મરાન્તકઃ ।
રક્તપઃ પાનપઃ સિદ્ધઃ સિદ્ધિદઃ સિદ્ધસેવિતઃ ॥ ૨॥

કઙ્કાલઃ કાલશમનઃ કલાકાષ્ઠાતનુઃ કવિઃ ।
ત્રિનેત્રો બહુનેત્રશ્ચ તથા પિઙ્ગલલોચનઃ ॥ ૩॥

શૂલપાણિઃ ખડ્ગપાણિઃ કઙ્કાલી ધૂમ્રલોચનઃ ।
અભીરુર્ભૈરવીનાથો ભૂતપો યોગિનીપતિઃ ॥ ૪॥

ધનદોઽધનહારી ચ ધનવાન્ પ્રતિભાનવાન્ ।
નાગહારો નાગપાશો વ્યોમકેશઃ કપાલભૃત્ ॥ ૫॥

કાલઃ કપાલમાલી ચ કમનીયઃ કલાનિધિઃ ।
ત્રિલોચનો જ્વલન્નેત્રસ્ત્રિશિખી ચ ત્રિલોકપઃ ॥ ૬॥

ત્રિનેત્રતનયો ડિમ્ભશાન્તઃ શાન્તજનપ્રિયઃ ।
બટુકો બહુવેષશ્ચ ખટ્વાઙ્ગવરધારકઃ ॥ ૭॥

ભૂતાધ્યક્ષઃ પશુપતિર્ભિક્ષુકઃ પરિચારકઃ ।
ધૂર્તો દિગમ્બરઃ શૂરો હરિણઃ પાણ્ડુલોચનઃ ॥ ૮॥

પ્રશાન્તઃ શાન્તિદઃ શુદ્ધઃ શઙ્કરપ્રિયબાન્ધવઃ ।
અષ્ટમૂર્તિર્નિધીશશ્ચ જ્ઞાનચક્ષુસ્તપોમયઃ ॥ ૯॥

અષ્ટાધારઃ ષડાધારઃ સર્પયુક્ત શિખીસખઃ ।
ભૂધરો ભૂધરાધીશો ભૂપતિર્ભૂધરાત્મજઃ ॥ ૧૦॥

કઙ્કાલધારી મણ્ડી ચ આન્ત્રયજ્ઞોપવીતવાન્ ।
જૃમ્ભણો મોહનઃ સ્તમ્ભી મારણઃ ક્ષોભણસ્તથા ॥ ૧૧॥

શુદ્ધનીલાઞ્જનપ્રખ્યો દૈત્યહા મુણ્ડભૂષિતઃ ।
બલિભુગ્ બલિભુઙ્નાથો બાલોઽબાલપરાક્રમઃ ॥ ૧૨॥

સર્વાપત્તારણો દુર્ગો દુષ્ટભૂતનિષેવિતઃ ।
કામી કલાનિધિકાન્તઃ કામિનીવશકૃદ્ વશી ॥ ૧૩॥

જગદ્રક્ષાકરોઽનન્તો માયામન્ત્રૌષધીમયઃ ।
સર્વસિદ્ધિપ્રદો વૈદ્યઃ પ્રભવિષ્ણુરિતીવ હ્રિ હ્રીં ૐ ॥ ૧૪
(સર્વસિદ્ધિપ્રદો વૈદ્યઃ પ્રભવિષ્ણુઃ કરોતુ શમ્) ॥ ૧૪॥

ફલશ્રુતિપાઠઃ -
(શિવપાર્વતીસંવાદે)
અષ્ટોત્તરશતં નામ્ના ભૈરવસ્ય મહાત્મનઃ ।
મયા તે કથિતં દેવિ રહસ્યં સર્વકામદમ્ ॥

ય ઇદં પઠતિ સ્તોત્રં નામાષ્ટશતમુત્તમમ્ ।
ન તસ્ય દુરિતં કિઞ્ચિન્ન રોગેભ્યો ભયં ભવેત્ ॥

ન ચ મારીભયં કિઞ્ચિન્ન ચ ભૂતભયં ક્વચિત્ ।
ન શત્રુભ્યો ભયં કિઞ્ચિત્ પ્રાપ્નુયાન્માનવઃ ક્વચિત્ ॥

પાતકેભ્યો ભયં નૈવ યઃ પઠેત્ સ્તોત્રમુત્તમમ્ ।
મારીભયે રાજભયે તથા ચૌરાગ્નિજે ભયે ॥

ઔત્પાતિકે મહાઘોરે તથા દુઃસ્વપ્નદર્શને ।
બન્ધને ચ તથા ઘોરે પઠેત્ સ્તોત્રમનુત્તમમ્ ॥

સર્વં પ્રશમમાયાતિ ભયં ભૈરવકીર્તનાત્ ।
એકાદશસહસ્રન્તુ પુરશ્ચરણમુચ્યતે ॥

યસ્ત્રિસન્ધ્યં પઠેદ્દેવિ સંવત્સરમતન્દ્રિતઃ ।
સ સિદ્ધિં પ્રાપ્નુયાદિષ્ટાં દુર્લભામપિ માનવઃ ॥

ષણ્માસં ભૂમિકામસ્તુ જપિત્વા પ્રાપ્નુયાન્મહીમ્ ।
રાજશત્રુવિનાશાર્થં પઠેન્માસાષ્ટકં પુનઃ ॥

રાત્રૌ વારત્રયં ચૈવ નાશયત્યેવ શાત્રવાન્ ।

જપેન્માસત્રયં મર્ત્યો રાજાન વશમાનયેત્ ॥

ધનાર્થી ચ સુતાર્થી ચ દારાર્થી ચાપિ માનવઃ ।
પઠેન્માસત્રયં દેવિ વારમેકં તથા નિશિ ॥

ધનં પુત્રં તથા દારાન્ પ્રાપ્નુયાન્નાત્ર સંશયઃ ।
રોગી રોગાત્ પ્રમુચ્યેત બદ્ધો મુચ્યેત બન્ધનાત્ ।
ભીતો ભયાત્ પ્રમુચ્યેત તત્તદાપન્ન આપદઃ ॥

નિગડૈશ્ચાપિ બદ્ધો યઃ કારાગૃહનિપાતિતઃ ।
શ‍ૃઙ્ખલાબન્ધનં પ્રાપ્તઃ પઠેચ્ચૈવ દિવાનિશમ્ ॥

યાન્ યાન્ સમીહતે કામાઁસ્તાઁસ્તાનાપ્નોતિ માનવઃ ।
અપ્રકાશ્યં પરં ગુહ્યં ન દેયં યસ્ય કસ્યચિત્ ॥

સુકુલીનાય શાન્તાય ઋજવ દમ્ભવર્જિતે(ને) ।
દદ્યાત્ સ્તોત્રમિદં પુણ્યં સર્વકામફલપ્રદમ્ ॥

ય ઇદં પઠતે નિત્યં ધનધાન્યમવાપ્નુયાત્ ।

॥ ઇતિ શ્રીરુદ્રયામલેતન્ત્રેવિશ્વસારોદ્ધારે શ્રીમદાપદુદ્ધારકબટુકભૈરવસ્તોત્રં સમ્પૂર્ણમ્ ॥

Notes:

The Āpaduddhāraka Baṭuka Bhairava Aṣṭottaraśatanāma StotraM આપદુદ્ધારક બટુક ભૈરવ અષ્ટોત્તરશતનામસ્તોત્રમ્ from the RudrayāmalaTantraM રુદ્રયામલતન્ત્રમ્ and ViśvasāroddhāraTantraM વિશ્વસારોદ્ધારતન્ત્રમ્ given here comprises of the simpler procedure of MūlaPāṭha મૂલપાઠ and Phalaśruti ફલશ્રુતિ.

The Āpaduddhāraka Baṭuka Bhairava DhyānaM આપદુદ્ધારક બટુક ભૈરવ ધ્યાનમ્ that precedes this StotraM સ્તોત્રમ્ and the Nāmāvaliḥ નામાવલિઃ derived from the same (ĀpaduddhārakaBaṭukaBhairavĀṣṭottaraśataNāmāvaliḥ આપદુદ્ધારકબટુકભૈરવાષ્ટોત્તરશતનામાવલિઃ)can be accessed from the respective links given below.

There are other ways in which the pāṭha પાઠ of the StotraM સ્તોત્રમ્ can be conducted – that include Sṛṣṭi-Sthiti-Saṁhāra Krama Pāṭha સૃષ્ટિ-સંહાર-સ્થિતિ ક્રમ પાઠ, VilomaGarbha BaṭukaMantra Samputita Pāṭha વિલોમગર્ભ બટુકમન્ત્ર સમ્પુટિત પાઠ. These types of pāṭha પાઠ, and the details about the procedure (of Nyāsa ન્યાસ etc.)are mentioned in the referenced source publication.

Proofread by Ruma Dewan

*Apaduddharakabatukabhairav Ashtottarashata Nama Stotram*

pdf was typeset on October 27, 2025

Please send corrections to *sanskrit@cheerful.com*